विद्या भवन बालिका विद्यापीठ लखीसराय

वर्ग दशम् विषय संस्कृत विषयशिक्षक श्यामउदय सिंह

ता: 17-06-2021 (एन.सी.ई.आर. टी.पर आधारित )

पाठ: पञ्चम: पाठनाम जननी तुल्यवत्सला

1. **अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत-**
   i. कृषकः किं करोति स्म?
   ii. माता सुरभिः किमर्थं अश्रूणि मुञ्चति स्म?
   iii. सुरभिः इन्द्रस्य प्रश्नस्य किमुत्तरं ददाति?
   iv. मातुः अधिका कृपा कस्मिन् भवति?
   v. इन्द्रः दुर्बलवृषभस्य कष्टानि अपाकर्तुं किं कृतवान्?
   vi. जननी कीदृशी भवति?
   vii. पाठेऽस्मिन् कयोः संवादः विद्यते?

**उत्तराणि-**

viii. कृषकः क्षेत्रकर्षणं करोति स्म।
ix. भूमौ पतिते स्वपुत्रं दृष्ट्वा माता सुरभिः अश्रूणि मुञ्चति स्म।
x. सुरभिः इन्द्रस्य इदम् उत्तरं ददाति-"भो वासव! पुत्रत्य दैन्यं दृष्ट्वा अहं रोदिमि।"
xi. मातुः अधिका कृपा दीने पुत्रे भवति।
xii. इन्द्रः दुर्बलवृषभस्य कष्टानि अपाकर्तुं प्रवर्षं कृतवान्।
xiii. जननी सर्वेषु अपत्येषु तुल्यवत्सला परं दीजे पुत्रे कृपार्द्रहृदया भवति।
xiv. अस्मिन् पाठे सुरभिसुराधिपइन्द्रयोः संवादः विद्यते।

2. **'क' स्तम्भे दत्तानां पदानां मेलनं 'ख' स्तम्भे दत्तैः समानार्थकपदौः कुरुत-**

| **क स्तम्भ** | **ख स्तम्भ** |
|---|---|
| (क) कृच्छ्रेण | (i) वृषभः |
| (ख) चक्षुर्भ्याम् | (ii) वासवः |

| | |
|---|---|
| (ग) जवने | (iii) नेत्राभ्याम् |
| (घ) इन्द्रः | (iv) अचिरम् |
| (ङ) पुत्रा | (v) द्रुतगत्या |
| (च) खीघ्रम् | (vi) काठिन्येन |
| (छ) बलीवर्दः | (vii) सुताः |

3. **उत्तराणि-**

| **क स्तम्भ** | **ख स्तम्भ** |
|---|---|
| (क) कृच्छ्रेण | (vi) काठिन्येन |
| (ख) चक्षुभ्याम् | (iii) नेत्राभ्याम् |
| (ग) जवने | (v) द्रुतगत्या |
| (घ) इन्द्रः | (ii) वासवः |
| (ङ) पुत्रा | (vii) सुताः |
| (च) खीघ्रम् | (iv) अचिरम् |
| (छ) बलीवर्दः | (i) वृषभः |

4. **स्थूलपदमाधृत्य प्रश्ननिर्माणं कुरुत-**

i. सः **कृच्छ्रेण** भारम् उद्वहति।
ii. **सुराधिपः** ताम् अपृच्छत्?
iii. अयम् **अन्येभ्यो** दुर्बलः।
iv. **धेनूनाम्** माता सुरभिः आसीत्?
v. **सहस्राधिकेषु** पुत्रेषु सत्स्वपि सा दुःखी आसीत्।

**उत्तराणि-**

vi. सः **कथम्** भारम् उद्वहत?
vii. **कः** ताम् अपृच्छत्?
viii. अयम् **केभ्यः/ केभ्यो** दुर्बलः?
ix. **कासाम्** माता सुरभिः आसीत्?
x. **कति** पुत्रेषु सत्सवपि सा दुःखी आसीत